# Sarpaih Kritam Shiva Stotram

# સર્પૈઃ કૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Sarpaih Kritam Shiva Stotram

File name : sarpaiHkRRitaMshivastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | AvantyakhaNDa | adhyAya 51/35-42||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# સર્પૈઃ કૃતં શિવસ્તોત્રમ્

દીપદાનાદિનૈવેદ્યૈસ્તામ્બૂલમથ દક્ષિણાઃ ।
કર્પૂરાર્તિકરાઃ સર્વે મહાદેવમુપાગતાઃ ।
સ્તુતિમારેભિરે કર્તું સુધાકામાસ્તદોરગાઃ ॥ ૩૪॥

સર્પા ઉચુઃ ।
નમોઽનન્તાય બૃહતે સર્વદેવ નમો નમઃ ।
ચન્દ્રમૌલે નમસ્તેઽસ્તુ કપર્દિન્પરમાત્મને ।
વૃષધ્વજ નમસ્તેઽસ્તુ ત્રિશૂલવરધારિણે ॥ ૩૫॥

ત્ર્યમ્બકાય નમસ્તેઽસ્તુ જટામુકુટધારિણે ।
શેષહાર નમસ્તેઽસ્તુ ચિતાભસ્માઙ્ગધારિણે ॥ ૩૬॥

કૃત્તિવાસ નમસ્તેઽસ્તુ ગિરીશાય નમો નમઃ ।
ત્રિપુરઘ્ન નમસ્તેઽસ્તુ સ્મરાન્તક નમોઽસ્તુ તે ॥ ૩૭॥

મૃગવ્યાધ નમસ્તેઽસ્તુ ઘસ્મરાય નમો નમઃ ।
શઙ્કરાત્મન્નમસ્તેઽસ્તુ સર્વકામફલપ્રદ ॥ ૩૮॥

સર્વસાક્ષિન્નમસ્તેઽસ્તુ સર્વભૂતાશયાકૃતે ।
સર્વાધાર નમસ્તેઽસ્તુ સર્વશક્તિધરાય ચ ॥ ૩૯॥

સર્વભોગ નમસ્તેઽસ્તુ સર્વબીજસમુદ્ભવ ।
દિવ્યહાસ નમસ્તેઽસ્તુ નમોઽમૃતસ્રવાય ચ ॥ ૧.૫૧.૪૦॥

કામ્યકામ નમસ્તેઽસ્તુ સર્વકામવરપ્રદ ।
નમઃ શિવાય શાન્તાય પશૂનાં પતયે નમઃ ॥ ૪૧॥

નમો મૃડાય દાન્તાય શાન્તરૂપાય વૈ નમઃ ॥ ૪૨॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે અવન્તીક્ષેત્રમાહાત્મ્યે
એકપઞ્ચાશત્તમાધ્યાયાન્તર્ગતં સર્પૈઃ કૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । આવન્ત્યખણ્ડ । અધ્યાય ૫૧/૩૫-૪૨ ॥

skandapurANa . AvantyakhaNDa . AvantyakhaNDa . adhyAya 51/35-42..

Proofread by PSA Easwaran

*Sarpaih Kritam Shiva Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*